National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 284-285
© 2026 NJHSR
www.sanskritarticle.com

**दीप्तिरेखा मिश्र**
शोधच्छात्रा,
सदाशिवपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,

**Correspondence:**
**दीप्तिरेखा मिश्र**
शोधच्छात्रा,
सदाशिवपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,

# सिंहलविजयनाटके प्राकृत्रिकचित्रणाभिप्रेरणम्

**दीप्तिरेखा मिश्र**

श्रीमता पण्डितश्रीसुदर्शनपाठिशर्मणा विरचिते सिंहलविजयनाटके प्रकृतिचित्रणमत्यन्तमनोमुग्धकरं भवति। श्रीसुदर्शनपाठिशर्मणः विभिन्नासु कृतिषु स्थितस्य प्रकृतिचित्रणस्य दर्शनेन स्पष्टं भवति यत् तस्य हृदये प्रकृतिं प्रति अगाधः प्रेमोऽस्ति । प्रधानतया सौन्दर्यान्वेषेकः कविः सन् सः यत्र मानवसौन्दर्यस्य निरीक्षणं कृतवान् तत्र सः प्रकृतिसौन्दर्यस्य अपि अन्वेषणं कुर्वन् वर्त्तते स्म। कविः सिंहलस्य प्रकृतिशोभां वर्णयन् कथयति-

**वनं जलनिधेस्तीरे प्रसन्नाः सर्वतो दिशः**
**आम्रादिभिर्विशोभन्ते केदाराः शस्यपूरिताः ।।**
**परं सन्दृश्यन्ते युवतयः तः शस्त्रनिपुणाः**
**गृहेभ्यः श्रूयन्ते सततमिहं सच्छास्त्रविषयाः**
**बहुत्वं रत्नामपि भवति पण्येषु सुतरां**
**गुणः सर्वोऽप्येषामनुहरति कलिङ्गविभवम् ।।**[1]

राजपथस्य केचन नागरिकाः वदन्ति अरे वयं मोतिफलान्यपि न इच्छामः । यतो हि मोतिफलेभ्यः अधिकमूल्यानि फलानि अस्माकं प्रकृतौ वर्त्तते । अर्थात् यत्र रमण्यः सन्ति किञ्च याः रमण्यः अङ्गेषु चन्दनानि प्रयुज्य समायान्ति ताः सर्वा अपि मोतिरत्नमिव परिशोभन्ते । उच्यते यथा-

**कामं चन्दनसर्वाङ्गाः मुक्ताफलविभूषणः**
**सिंहलान् विचरिष्यामः त्वादृश्यो यत्र नायिकाः ।।**[2]

यदा उत्कलीयसैनिकाः योद्धं देशान्तरं गच्छतन्ति तदा ते स्वात्मनि विश्वस्य सर्वत्र समायान्ति। ते परस्परयोः सौहार्द्यं संस्थाप्य समरपथे यान्ति । सर्वदैव उत्कलस्य जयध्वनिं गायन्ति एतदेव एकत्वस्य मन्त्रः भवति । हे सैनिकाः सर्वे बाहुबलं धरन्तु उत्कलमातुः वयं सर्वे सन्तानाः अस्माकं किमपि न भविष्यति । सर्वदा अस्माकं जयः भवेयुः एवं प्रकारेण जयध्वनिं गायन्तः मार्गे गच्छन्ति ।

**जयत जयत वीराः जयत जयनशीलाः**
**ध्वनति विजयभेरी तनुत समरलीलाः**
**रिपुकुलबलदलनकुशल**
**भुजबलमिह कलयत वराः**
**एत हे जयत जयत वीराः ।।**[3]

सुमहद्भारतवर्षस्य या प्राकृतिकी शोभासीत् तत्तु अवर्णनीयमेव । अनेकाभिः नदीभिः धौतः अयं देशः किञ्च शुचपर्वतैः अयं देशः परिशोभितः आसीत्। किञ्च नाटकानुसारं भारतप्रदेशस्य पूर्वभागे उत्कलप्रदेशः विराजते यस्मिन् प्रदेशे बहवः नद्यः तथा तालतमालवृक्षस्य शोभा जनानां मनसि अपूर्वां सौन्दर्यशोभां जनयति। एवं रूपेण एकाम्रक्षेत्रस्य विन्दुसागरसरोवरः भक्तानां मनसि एकां भक्तिपूर्णां भावनां संजागरयति। वनराजिपरिवेष्टितमुत्कलप्रदेशं संवीक्ष्य सर्वे विमुग्धाः भवन्ति। विभिन्नैः पुष्पैः विमण्डितः अयमुत्कलप्रदेशः वर्त्तते इति सर्वैः स्वीक्रियते। गिरिगह्वरकानने जनानां निवासः समेषां मनसि आनन्दं जनयति । एवं रूपेण नाटकेऽस्मिन् प्रकृतेः शोभा अतीव रमणीया वर्त्तते इति सर्वैः अङ्गीक्रियते । कविः क्षेमभद्रस्य मुखेन वैतरणीनद्याः सौन्दर्यं परिवर्धयति।

**चल रे चल मम तरणि**
**कावेरीवारिणि तरङ्गिणि ।।**[4]

किञ्च यदा कलावती तीर्थपर्यटकान् अवोचत् उत्कलप्रदेशस्य विषये कथयितुं तदा ते उत्कलप्रदेशस्य वर्णनं कुर्वन्तः अकथयन् अयमुत्कलप्रदेशः तमालवेष्टितः रसालोपवनं वटाश्वसमन्वितं कीर्तिभिः विराजितम् । उत्कलप्रदेशस्य रम्यतां प्रकटयति। किञ्च सर्वैरपि इदं स्वीकृतं यत् प्रकृतेः अपूर्वा शोभा उत्कलप्रदेशे विराजते। उत्कलप्रदेशस्य नौवाणिज्यप्रथापि प्राचीनपरम्परासीदिति सर्वैः स्वीक्रियते नीलसमुद्रस्य वक्षस्येव अस्य प्रदेशस्य जनाः गत्वा वाणिज्यस्य महत्परम्परां प्रतिष्ठितवन्तः। एवं रूपेण उत्कलप्रदेशस्य शोभा रमणीयासीदिति नाटकादस्मात् विज्ञायते ।

सिंहलविजयनाटकस्य नदीपर्वतादिवर्णनं प्रकृतिचित्रणस्य सुन्दरं निदर्शनमस्ति । तथैव प्रकृतेः बाह्यपक्षस्य अन्तःपक्षस्य च सुन्दरं चित्रणं प्राप्यते। अत्र प्रकृतेः सुन्दरात् सुन्दरतरापि अनेकानि चित्राणि वर्त्तन्ते यानि कवेः प्रकृतिं प्रति आकर्षणं तच्चित्रणकौशलं प्रकटयति। यतोहि नाटकेऽस्मिन् नदीपर्वतवृक्षादीनां सौन्दर्यमेतादृशमभिहितं तद् अवर्णनीयं वर्त्तते। किञ्च नद्यां गमनसमये नाविकस्य गीतगायनं प्रकृतिवर्णनं च अतीव चिदाकर्षकं भवति । नदी वस्तुतः नैसर्गिकः जलमार्गः भवति। प्रायेणैतत् जलं मृदुजलं भवेत्। जलमेतत् महासागरं प्रति कासारं प्रति समुद्रं प्रति अथवा अन्यां काञ्चित् नदीं प्रति प्रवहद्भवति। केषुचित्प्रकरणेषु नदी तु धरातलस्य अन्तरे गच्छति अथवा अन्यं किञ्चित् जलाशयं अप्राप्यैव शुष्यति। नाटकेऽस्मिन् कावेरीनद्याः महानद्याः ब्राह्मणीनद्याश्च वर्णनं मृत्प्रतिपादकं भवति। नाटकस्य प्रथमाङ्कस्य तृतीयदृश्ये महदाडम्बरेण प्रकृतेः सौन्दर्यं वर्णितमस्ति। अत्र वनमार्गः, अपूर्वा वनशोभा अत्यन्तं रमयति प्रकृतिम् ।

**वनं जलनिधेस्तीरे प्रसन्नाः सर्वतो दिशः**
**आम्रादिभिर्विशोभन्ते केदाराः शस्यपूरिताः ।।**[5]

अर्थात् तस्मिन् पर्वते बहूनां पुष्पाणां विकसनमासीत् किञ्च तेषां पुष्पाणां विकसनेन चतुर्दिशः सुगन्धमानाः आसन् अपि जनानां लोचनानि आकर्षयन्ति इति । अत्र न केवलं वृक्षाणां शोभा अपि तु लताभिरपि शोभतेतरामिदं वनम्। लतानां पुष्पैः वृक्षाणां किसलयैः जनाकर्षयति वनमिदम्। प्रकृतेः शोभा नितरां परिवर्धयति वनमिदम्। अत्र सागरस्यापि आख्यानं क्रियते। यथा सप्तशय्यां परित्यज्य गरिगह्वरवासिनी सभलोद्धारिणी ह्ये स्रवन्ती याति सागरम् । यदा नाविकः नद्यां नावं चालयति तदा तस्य मुखारविन्दे गीतानि समायानि तैश्च गीतैः न केवलं तस्यानन्दः समायाति अपि तु गच्छतां पथिकानामपि प्रमोदः जनयति । कलावतीमुखे यथा-

**मन्दं वहता चन्दनमरुता सुध्यतु ते परितः सुखसरणी**
**तव शुभमङ्कं मधुरमनङ्कं वाञ्छतु भोगवती सुरतरुणी ।।**[6]

सिंहलविजयनाटके प्रकृत्याः रुचिरत्वं परिलक्ष्यते एव । चोलदेशस्य सिंहलदेशस्य च राजसिहांसनात् आरभ्य उत्कलक्षेत्रं यावत् प्रतिसन्दर्भं रुचिकरं प्रतिभाति । किमधिकं वा लतानां नदीनां वृक्षाणां शोभा, ततोऽपि समुद्रगृहस्य परिकल्पना सर्वत्र सुशोममस्तीति प्रतिभाति। अत्र पक्षिणः मण्डपवेद्याः निर्माणं कुर्वन्ति स्म । एतत् सर्वं दृष्ट्वा एवं मन्यते यत् एते पक्षिणः विश्वक्रर्मणः कदाचित् गुरुः स्यात्। एवं प्रकारेण इमे पक्षिणः निर्मितवन्तः यत् चारोरपि चारुत्वं प्रतिभाति स्म। पुनरपि प्रभातकालस्यापि वर्णना श्रीमता पण्डितसुदर्शन-पाठिशर्मणा समीचीनतया कृताऽस्ति। अस्मिन् नाटके पण्डितप्रवरः श्रीसुदर्शनपण्डितशर्मणा सुन्दरतया प्रभातवर्णनामकरोत्। अत्र कावेरीनद्यां प्रभातकाले पथिकाः स्वस्थानात् उत्थाय नित्यकर्म समाप्य परमेश्वरस्य चिन्तनं कुर्वन्ति स्म। परन्तु चोलराज्ये तु प्रभातसमयः अतीवमनोहारी अस्ति। नाटकप्रारम्भे राजकार्यं प्रचलदस्ति। अन्तेवासिनां वार्तालापः मन्त्रोच्चारणमिव अतीव मनोहार्यस्ति। प्रभातसमये एषा नगरी अम्बरविन्दुजलेन धरापृष्टं शौचं करोति। तदनन्तरं वायुः मलयाचलगन्धेन मन्दं मन्दं वहति। अस्मिन्नेव समये प्रजाः सन्ध्यावन्दानादिकं समाचरन्ति। कोकिलस्य ध्वनिना सम्पूर्णाऽपि उत्कलराज्यं पवित्रीभवति। किञ्च सर्वेभ्यः ब्रह्मणेभ्यः मुखात् वेदगानञ्च पूतीकरोति नगरीमिमाम्। अस्माकं परितः यः दृश्यमानोऽस्ति सः परिवेशः पूत एव। भारतदेशो देवभूमित्वेन परिणतः जातः। यतो हि अस्मिन् देशे महाकवयः जन्मग्रहणं कृत्वा स्वप्रतिभया सुविख्याता अभवन् । प्रभुः दत्तप्रकृतिरयं देशः।

सिंहलविजयनाटके प्रभातेन सह सांयकालस्य वर्णना सुचारूपेण सुवर्णिता विद्यमानास्ति । सायंकाले जनाः मन्त्रोच्चारणं समाचारन्ति स्म। अस्मिन् काले सूर्यस्यापि रश्मी मन्दायते। तद्दृश्यमतीव रमणीयकरं भवति। अस्मिन् समये खगाः स्वनीडं प्रत्यागच्छन्ति। कविरत्र उपमालंकारस्य प्रयोगेण खगानां कुजनं सुमधुरं गीतगायनस्य शोभां वर्णयति। किञ्चास्मिन् श्रीजगन्नाथविलासनाटके नदीवर्णना सुचारूरूपेण सुवर्णिता विद्यमानास्ति। अस्माकं भारतदेशे नैकाः नद्यः सन्ति। तासां नदीनां कलनादः अतीव रमणीयो हृदयाह्लादायकः। इत्येवं प्रकारेण सिंहलविजयनाटकेऽस्मिन् प्रकृतेः सौन्दर्यमुप-वर्णितमिति ।

**पादटिप्पण्यः-**

1.सं.वि.ना.पृ.सं-115
2.सं.वि.ना.पृ.सं-82
3.सं.वि.ना.पृ.सं-178
4.सं.वि.ना.पृ.सं-22
5.सं.वि.ना.पृ.सं-115
6.सं.वि.ना.पृ.सं-142